यम्। इत्यमरः। ३। ३। ५४॥ (यथा गीतायां १८।१४।
"अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्"॥)
हेतुः। कर्म्म। हस्तलेपः। नृत्यप्रभेदः। गीतविशेषः। (तत्ते व्यवस्थापकस्ताड़नविशेषः।
यदुक्तं राजकन्दर्पेण।
"नृत्यवादित्रगीतानां प्रयोगवशभेदिनां।
संस्थानं ताड़नं रोधः करणानि प्रचक्षते"॥
अस्य प्रमाणं यथा कुमारे ६। ४०।
"शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम्।
अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः"॥)
क्रियाभेदः। संवेशनम्। कायस्थः। इति मेदिनी॥
कायस्थसंहतिः। वर्णानां स्पृष्टतादि। योगिनामासनादि। क्षतादि। इति हेमचन्द्रः॥ (सर्व्वेषामादिकारणत्वात् विष्णुः। यथा, महाभारते १३।१७९।५४।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"॥
लेख्यपत्रसाक्षिदिव्यादि। यथा मनुः ८। ४१।
"अर्थेऽपव्ययमानन्तु करणेन विभावितम्।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः"॥
भावे ल्युट्। कृतिः। यथा रामायणे ४।१७।५६॥
"धर्म्मतः श्रेयकरणे प्रतीक्षिष्यामहे वयम्"॥)
करणः, पुं, शूद्रावैश्ययोर्जातजातिविशेषः। इत्यमरः। २।१०।२॥ अयं लिखनवृत्तिः कायस्थ इति ख्यातः। इति भरतः॥ यथा,—
"शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः"।
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥*॥
अपि च।
"कायस्थे साधने क्लीवं पुंसि शूद्राविशोः सुते"।
इति करणशब्दार्थे मेदिनी॥*॥ अन्यच्च।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसद्रविड़ एव च"॥
इति मानवे १०।२२॥ झल्लोमल्लश्चेति। "क्षत्रियात् व्रात्यात् सवर्णायां झल्लमल्लनिच्छिविनटकरणखसद्रविड़ाख्या जायन्ते। एतान्यप्येकस्यैव नामानि"। इति तट्टीकायां कुल्लूकभट्टः॥*॥
तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्द्धि कीटस्त्रिजन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः॥
तमःकुण्डे वर्षशतं स्थित्वा स्वर्णवणिक् भवेत्।
जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत्॥
विश्वेकलिपिकर्त्ता च भक्ष्यदातुर्धनं हरेत्॥
कायस्थेनोदरस्थेन मातुर्म्मांसं न खादितम्।
तत्र नास्ति कृपा तस्य दन्ताभावेन केवलम्॥
स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर।
नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम्।
शतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ॥
सुबुद्धिः शिवयुक्तिश्च शास्त्रज्ञो धर्म्ममानसः।
न विश्वसेत्तेषु तात स्वात्मकल्याणहेतवे"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः॥
करणत्राणं, क्ली, (करणं ज्ञानकर्म्मादिरूपं इन्द्रियं त्रायतेऽनेन। करण + त्रै + करणे + ल्युट्। मस्तकस्य प्रधानकरणैकादशस्य मनसः स्थलत्वात्। करणैरिन्द्रियादिकर्म्मेन्द्रियादिभिः त्रायते वा इति कर्म्मणि ल्युट्।) मस्तकम्। इति हेमचन्द्रः॥
करणीयं,त्रि, (कर्त्तुमुचितं कर्त्तुमर्हं वा। कृ + अनीयर्।) कर्त्तव्यम्। कार्य्यम्। इति व्याकरणम्॥
(यथा रामायणे ३।१४।१०।
"मया किं करणीयञ्च इत्युक्ते द्विजसन्निधौ।
सर्व्वैरेव च तैरार्त्तैर्वागियं समुदाहृता"॥)
करण्डः, पुं, (कृञ् + "कृदृभृवृञः"। इत्यण्डन्। उणां।१।१२८।) मधुकोषः। मौचाक् इति भाषा। असिः। कारण्डवपक्षी। दलाढ़कम्। इति मेदिनी हेमचन्द्रश्च॥ वंशादिरचितभाण्डविशेषः समुद्गश्च। इत्यमरः। ३। ५। १८॥ साजि झाँपि इत्यादि भाषा। (यथा भागवते ५। १४। ४। "एवमेव गृहाश्रमः कर्म्मक्षेत्रं यस्मिन् न हि कर्म्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः"॥)
करण्डी, [न्] पुं (करण्डस्येव आकारोऽस्यास्तीति। करण्ड + इनिः।) मत्स्यः। इति त्रिकाण्डशेषः। (मत्स्यशब्देऽस्य गुणादिकथनं ज्ञेयम्॥)
करतलः, पुं, (करस्य हस्तस्य तलः।) हस्ततलः। हातेर तेलो इति भाषा।(यथा।जयदेवः।१।४५॥
"करतलतालतरलवलयावलिकलितकलस्वनवंशे"
अपि च। यथा, श्रीभागवते। ८। ७। ४२॥
"ततः करतलीकृत्य व्यापि हालाहलं विषम्।
अभक्षयन् महादेवः कृपया भूतभावनः"॥)
करतालं, क्ली, (कराभ्यां हस्ताभ्यां दीयमानस्तालो यत्र।) वाद्यविशेषः। यथा,—
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम्।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत्"॥
झल्लकं कांस्यनिर्म्मितकरतालकम्। इति तिथ्यादितत्त्वे रघुनन्दनभट्टाचार्य्येण व्याख्यातम्॥
करताली, स्त्री, (करताल + गौरादित्वात् ङीष्।) वाद्यविशेषः। करताल खरताल इति ख्याता। तत्पर्य्यायः। करर्द्धिः २। इति त्रिकाण्डशेषः॥ करतलध्वनिः। तथा च। "यथा न स्यादालीकपटकरतालीमटुरवः"। इति उद्भटः॥
करतोया, स्त्री, (करात् शङ्करस्य हस्तात् च्युतं तोयं जलं अस्ति यत्र। अर्श आद्यच्।) स्वनामख्यात-उत्तरदेशस्थनदीविशेषः। तत्पर्य्यायः। सदानीरा २। इत्यमरः। १। १०। ३३॥ सदानीरवहा ३। इति शब्दरत्नावली॥*॥ गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्करस्य तोयं विद्यतेऽत्र इति करतोया। श्रावणे एतदन्यं सर्व्वा नद्यो रजस्वलाः इयं तु न रजस्वला अतएव सदा सर्व्वदा नीरमस्या इतिसदानीरा। तथा च स्मृतिः।
"अषाढ़ादौ कर्कटे देवी त्र्यहं गङ्गा रजस्वला।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी"॥
इत्यमरटीकायां भरतः॥ (इयं हि तीर्थविशेषः। यथा महाभारते ३। तीर्थयात्रापर्व्वणि।८५।३॥
"करतोयां समासाद्य त्रिरात्रोपषितो नरः।
अश्वमेधमवाप्नोति प्रजापतिकृतो विधिः"॥)
करद्रुमः, पुं, (किरति शाखाः सर्व्वतः यः। स चासौ द्रुमश्चेति।) कारस्करवृक्षः। इति राजनिर्घण्टः॥
करपत्रं, क्ली, (करेण करात् वा पततीति। पत + "सर्व्वधातुभ्यः ष्ट्रन्" इति ष्ट्रन्।) क्रकचः। इत्यमरः। २। १०। ३५॥ करात् इति भाषा। (करौ पत्रमिव नौरिव यत्र।) जलक्रीड़ा। इति जटाधरः॥
करपत्रवान्, [त्] पुं, (करपत्राकारपत्रमस्ति यस्मिन् मतुप् मस्य वः।) तालवृक्षः। इति शब्दचन्द्रिका॥
करपत्रिका, स्त्री, (करौ पत्रं नौरिव यस्याः। पत्र + कप् + टाप् + अत इत्वम्।) जलक्रीड़ा। इति जटाधरः॥
करपर्णः, पुं, (करो हस्तः तद्वत्पर्णं यस्य।) भिण्डावृक्षः। रक्तैरण्डः। इति राजनिर्घण्टः॥ (एरण्डशब्देऽस्य विशेषः उक्तः॥)
करपल्लवः, पुं, (करस्य पल्लव इव।) अङ्गुलिः। यथा, मार्कण्डेये ८४।२६।
"करपल्लवसङ्गीनि तैरस्त्राणि च सर्व्वतः"॥
करपात्रं, क्ली, (करः पात्रमिव यत्र।) जलक्रीड़ा। इति हारावली॥
करपालः, पुं, (करं पालयति रक्षति। पाल + कर्म्मण्यण्।) खड्गः। इत्यमरः। २। ८। ८९॥
करपालिका, स्त्री, (करपाल् + ण्वुल् + टाप् अत इत्वम्।) कृष्णगदाकारहस्तदण्डः। सोँटा इति ख्यातः। इति भरतः॥ एकधाराखड्गम्। इति स्वामी। तत्पर्य्यायः। ईली २। इत्यमरः। २। ८९१॥ इली ३ इलिः ४ करवालिका ५। इति तट्टीका॥
करवालः, पुं, (करस्य वालः पुच्छ इव। नखस्य करजातत्वात् तथात्वम्।) नखम्। इति शब्दमाला॥ (करं वलति संवृणोति वल + अण्।) खड्गः। इत्यमरटीकायां भरतादयः। करवाल इति भाषा। (यथा, गीतगोविन्दे। १। १०।
"म्लेच्छनिवहनिधने कलयसि करवालम्"॥)
करवालिका, स्त्री, (कर + वल + ण्वुल् + टाप् + अत इत्वम्।) करपालिका। इत्यमरटीकायां रायमुकुटादयः॥
करभः, पुं, (कृणाति कीर्य्यतेऽनेन वा। कृञ् हिंसायां कृ विक्षेपे वा "कृशृशलिकलिगर्द्दिभ्योऽभच्"। उणां।३।१२२। इति अभच्। करे भाति शोभते इति वा। भा + कः।) मणिबन्धावधिकनिष्ठापर्य्यन्तं करस्य वहिर्भागः। (यथा, रघुः। ६।८३।
"धात्री कराभ्यां करभोपमोरुः"॥)
उष्ट्रशिशुः। इत्यमरः॥ २।९।७५।
करिशावकः। इत्यमरटीकासारसुन्दरी॥ (यथा भागवते ८।२।२२।
"सघर्म्मितमः करिभिः करेणुभि-
र्वृतोमदच्युत्करभैरनुद्रुतः"॥)
उष्ट्रः। इति मेदिनी॥ नखनामगन्धद्रव्यम्।
इति राजनिर्घण्टः॥ कटिः। इति जटाधरः॥
करभकाण्डिका, स्त्री, (करभप्रियं काण्डमस्याः।